विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः सप्तमः

Issue: Seventh

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

१/१०/२०१३

1/10/2013

## *काव्यात्म-विमर्शः*

क आत्मा मूलतत्त्वं किं काव्यस्येति विचारणा ।
प्रवर्तते पुराकालान्मध्ये साहित्यशास्त्रिणाम् ॥१॥

तस्मान्नानाविधा जाताः, सम्प्रदाया मनीषिणाम् ।
रसो रीतिर्ध्वनिश्चैव वक्रतालाङ्कृतिस्तथा ॥ २ ॥

सहस्राधिकवर्षेभ्यो वादा नैके चलन्ति वै ।
अद्यावधि विचारो ऽयं काव्यवित्सु प्रवर्तते ॥ ३ ॥

यथा साम्प्रतिके काले काव्यं नव्यं विलक्षणम् ।
तथा वै काव्यशास्त्रे ऽपि तर्काश्चर्चा नवा नवाः ॥ ४ ॥

विंशशत्युत्तरार्धे हि ब्रह्मानन्देन शर्मणा ।
सत्यालोके हि काव्यस्य सत्ये सत्ता प्रतिष्ठिता ॥ ५ ॥

विमर्शो नूतनः सृष्टो नवीना सरणिः श्रिता ।
तथा समाजवादस्य समावेशः स्वतः कृतः ॥ ६ ॥

सिद्धा रामप्रतापेन चमत्कारस्य चात्मता ।
चमत्कार-विचारस्य चर्चा ऽऽरब्धा पुनः पुनः ॥ ७ ॥

उक्तो रेवाप्रसादेन, चाचार्येण द्विवेदिना ।
काव्ये ऽलङ्कार एवात्मा सो ऽलम्भाव इति स्थितः ॥ ८ ॥

सौन्दर्ये संस्थितो नूनं नैव वाच्यः कदाचन ।
न मान्यो ध्वनिसिद्धान्तस्त्वलं ब्रह्मेति मन्यताम् ॥ ९ ॥

राधावल्लभविज्ञेन सिद्धान्तो मौलिको धृतः ।
अलङ्कारस्त्रिधा काव्ये जीवनं वै सुनिश्चितम् ॥ १० ॥

यथा विश्वे तथा काव्ये त्रैविध्यं सन्निरूपितम् ।
अतः स एव साहित्ये मानदण्डः सनातनः ॥ ११ ॥

अभिराजेन्द्रमिश्रेण रसात्मत्वं विखण्डितम् ।
व्यङ्ग्यार्थ एव काव्यात्मा ध्वनौ वै प्रतिभोत्थितः ॥ १२ ॥

रसो व्यङ्ग्यार्थविश्रान्तिः परा वर्धनसम्मता ।
एवं व्यङ्ग्यात्मता सिद्धा कविवर्येण धीमता ॥ १३ ॥

इत्थमाधुनिके काले काव्यशास्त्रविदां वरैः ।
काव्यस्यात्मा विमृष्टो ऽथ विद्वद्भिश्च विमृश्यताम् ॥ १४ ॥

हरिदत्तशर्माविरचिताः श्लोकाः

*सुन्दरीदशकम्*

हठाद्विद्युच्छटादृग्भ्यां सहृदां ह्लादकारिणीम् ।
कुचभारनतां तन्वीं रामां नित्यम् उपास्महे ।। १ ।।

यस्या भावम् अनालम्ब्य न सुन्दारिर् अभुज् जयी ।
सा मे हृत्कुमुदास्फारं करोतु रतिदेवता ।। २ ।।

यां दृष्ट्वा न सुरासोमविभेदो ज्ञायते भुवि ।
वन्दे मन्मथरुद्राग्निसन्तापशमकारिणीम् ।। ३ ।।

यस्या भावं समाविश्य जगाद जगतां गुरुः ।
मुक्तिर्हि नाम नैवान्यद्वामाङ्करमणं हि तत् ।। ४ ।।

शक्रः शताक्षः सोमार्धचूडो ऽलिङ्गश् च यद्वशे ।
जायते किं न सा पूज्या नीलोत्पलदलेक्षणा ।। ५ ।।

वाग्रूपतां समालिङ्ग्य या ब्रह्माणं वशे ऽनयत् ।
वन्दे तां वामनयनां चेतसो ह्लादकौमुदीम् ।। ६ ।।

तां स्मरामि ज्वलद्दावदग्धानां हिमसीकरैः ।
पुनरुज्जीवनीं कान्तामेकां मन्मथदेवताम् ।। ७ ।।

यस्याधररसाह्लादो ब्रह्मानन्दसहोदरः ।
रामारतिमहायोगवञ्चिताश् छद्मयोगिनः ।। ८ ।।

मूको ऽपि वाग्मी मनुते दुर्जनः सुजनायते ।
यत्कटाक्षं समालब्धुं सा साक्षात् किं न देवता ।। ९ ।।

त्रिलोकाधिपतिर्भूत्वा भैक्ष्यं चरति रावणः ।
यां द्रष्टुं महिमा तस्या वल्मीकस्थः कथं वदेत् ।। १० ।।

यो जपेत्श्लोकदशकं सुन्दर्या सन्निधाव् इदम् ।
स एव लभते तस्यां लयजन्यं महत्सुखम् ।। ११ ।।

इति स्थानेश्वररतिमल्लिनाकृताः श्लोकाः

विद्युद्दूतस्य सप्तमाङ्कः समाप्तः